# Shri Bhutanatha or Ayyappasvami SuprabhAtam

# શ્રીભૂતનાથ અથવા અય્યપ્પસ્વામિનઃ સુપ્રભાતમ્

## Document Information

Text title : Bhutanathasuprabhatam

File name : bhUtanAthasuprabhAtam.itx

Category : deities_misc, ayyappa, suprabhAta

Location : doc_deities_misc

Proofread by : PSA Easwaran

Description/comments : From Shastrarchana, Kannada publication

Latest update : July 10, 2021

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 10, 2021

*sanskritdocuments.org*

Shri Bhutanatha or Ayyappasvami SuprabhAtam

# શ્રીભૂતનાથ અથવા અય્યપ્પસ્વામિનઃ સુપ્રભાતમ્

શ્રીગણેશાય નમઃ ।
શ્રીકણ્ઠપુત્ર હરિનન્દન વિશ્વમૂર્તે
લોકૈકનાથ કરુણાકર ચારુમૂર્તે ।
શ્રીકેશવાત્મજ સુમનોહર સત્યમૂર્તે
શ્રીભૂતનાથ ભગવન્ તવ સુપ્રભાતમ્ ॥ ૧॥

શ્રીવિષ્ણુરુદ્રસુત મઙ્ગળ કોમલાઙ્ગ
દેવાધિદેવ જગદીશ સરોજનેત્ર ।
કાન્તારવાસ સુરમાનવવૃન્દસેવ્ય
શ્રીભૂતનાથ ભગવન્ તવ સુપ્રભાતમ્ ॥ ૨॥

આશાનુરૂપફલદાયક કાન્તમૂર્તે
ઈશાનકેશવસુત મણિકણ્ઠ સુદિવ્યમૂર્તે ।
ભક્તેશ ભક્તહૃદયસ્થિતભૂમિપાલ
શ્રીભૂતનાથ ભગવન્ તવ સુપ્રભાતમ્ ॥ ૩॥

સત્યસ્વરૂપ સકલેશ ગુણાર્ણવેશ
મર્ત્યસ્વરૂપ વરદેશ રમેશસૂનો ।
મુક્તિપ્રદ ત્રિદશરાજ મુકુન્દસૂનો
શ્રીભૂતનાથ ભગવન્ તવ સુપ્રભાતમ્ ॥ ૪॥

કાલારિપુત્ર મહિષીમદનાશન શ્રી
કૈલાસવાસ શબરીશ્વર ધન્યમૂર્તે ।
નીલામ્બરાભરણશોભિતસુન્દરાઙ્ગ
શ્રીભૂતનાથ ભગવન્ તવ સુપ્રભાતમ્ ॥ ૫॥

નારાયણાત્મજ પરાત્પર દિવ્યરૂપ
વારાણસીશશિવનન્દન કાવ્યરૂપ ।
ગૌરીશપુત્ર પુરુષોત્તમ બાલરૂપ

શ્રીભૂતનાથ, ભગવાન્ તવ સુપ્રભાતમ્ ॥ ૬॥

ત્રૈલોક્યનાથ ગિરિવાસ વનેનિવાસ
ભૂલોકવાસ ભુવનાધિપદાસ દેવ ।
વેલાયુધપ્રિયસહોદર શમ્ભુસૂનો
શ્રીભૂતનાથ ભગવન્ તવ સુપ્રભાતમ્ ॥ ૭॥

આનન્દરૂપ કરધારિતચાપબાણ
જ્ઞાનસ્વરૂપ, ગુરુનાથ, જગન્નિવાસ ।
જ્ઞાનપ્રદાયક જનાર્દનનન્દનેશ
શ્રીભૂતનાથ ભગવન્ તવ સુપ્રભાતમ્ ॥ ૮॥

અમ્ભોજનાથસુત સુન્દર ધન્યમૂર્તે
શમ્ભુપ્રિયાકલિતપુણ્ય પુરાણમૂર્તે ।
ઇન્દ્રાદિદેવગણવન્દિત બ્રહ્મચારિન્
શ્રીભૂતનાથ ભગવન્ તવ સુપ્રભાતમ્ ॥ ૯॥

દેવેશ દેવગુણપૂરિત ભાગ્યમૂર્તે
શ્રીવાસુદેવસુત પાવન ભક્તબન્ધો ।
સર્વેશ સર્વમનુજાર્ચિત દિવ્યમૂર્તે
શ્રીભૂતનાથ ભગવન્ તવ સુપ્રભાતમ્ ॥ ૧૦॥

નારાયણાત્મજ સુરેશ નરેશ ભક્ત-
લોકેશ કેશવશિવાત્મજ ભૂતનાથ ।
શ્રીનારદાદિ મુનિપુઙ્ગવપૂજિતેશ
શ્રીભૂતનાથ ભગવન્ તવ સુપ્રભાતમ્ ॥ ૧૧॥

આનન્દરૂપ સુરસુન્દરદેહધારિન્
શર્વાત્મજ શબરીશ સુરાલયેશ । સુગરીશ
નિત્યાત્મસૌખ્યવરદાયક દેવદેવ
શ્રીભૂતનાથ ભગવન્ તવ સુપ્રભાતમ્ ॥ ૧૨॥

સર્વેશ સર્વમનુજાર્જિતસર્વપાપ-
સંહારકારક ચિદાત્મક રુદ્રસૂનો ।
સર્વેશ સર્વગુણપૂર્ણકૃપામ્બુરાશે
શ્રીભૂતનાથ ભગવન્, તવ સુપ્રભાતમ્ ॥ ૧૩॥

ઓઙ્કારરૂપ જગદીશ્વર ભક્તબન્ધો
પઙ્કેરુહાક્ષ પુરુષોત્તમ કર્મસાક્ષિન્ ।
માઙ્ગલ્યરૂપ મણિકણ્ઠ મનોભિરામ
શ્રીભૂતનાથ ભગવન્ તવ સુપ્રભાતમ્ ॥ ૧૪॥

ઇતિ શ્રીભૂતનાથ અથવા અય્યપ્પસ્વામિનઃ સુપ્રભાતમ્ ।

Proofread by PSA Easwaran

*Shri Bhutanatha or Ayyappasvami SuprabhAtam*

pdf was typeset on July 10, 2021

Please send corrections to *sanskrit@cheerful.com*